॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः॥ श्रीकृष्णायजुर्वेदायनमः ॥ हरिः ॐ ॥ इषेत्वोर्जे
त्वावायवस्थोपायवस्थदेवोवः सविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्व
तीः पयस्वतीः प्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशꣳसोरुद्रस्यहेतिः परिवोवृणक्तुध्रुवा
अस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥१॥ इषेत्रिचत्वारिꣳशत् ॥१॥ यज्ञस्यघोषदसिप्रत्यु
ष्टꣳरक्षः प्रत्युष्टाअरातयः प्रेयमगाद्धिषणाबर्हिरच्छमनुनाकृतास्वधयावितष्टातआवहन्तिकवयः
पुरस्ताद्देवेभ्योजुष्टमिहबर्हिरासदेदेवानांपरिषूतमसिवर्षवृद्धमसिदेवबर्हिर्मात्वान्वगातिर्यक्पर्व
तेराध्यासमाच्छेत्तातेमारिषंदेवबर्हिः शतवल्शंविरोहसहस्रवल्शाः ॥१॥ विवयꣳरुहेमपृथिव्याःसं
पृचः पाहिसुसंभृतात्वासंभराम्यदित्यैरास्नासीन्द्राण्यैसन्नहनंपूषातेग्रंथिंग्रथ्नातुसतेमास्थादिंद्रस्य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰ त्वा बाहुभ्यामुपयच्छे बृहस्पतेर्मूर्ध्ना हराम्युर्वन्तरिक्षमन्विहि देवंगममसि ॥ २॥ सहस्रवल्शा अष्टात्रिंश सं॰ प्र॰ १
च्च ॥ २॥ शुन्धध्वं दैव्याय कर्मणे देवयज्यायै मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधाया असि पर
मेण धाम्ना दृꣳहस्व मा ह्वार्वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारꣳ हुतः स्तोको हुतो द्रप्सो
ऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याꣳ सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मा सं पृच्यध्वमृताव
रीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातये सोमेन त्वातनच्मीन्द्राय दधि विष्णो हव्यꣳ रक्षस्व ॥ १॥
सोमेनाष्टौ च ॥ ३॥ कर्मणे वां देवेभ्यः शकेयं वेषाय त्वा प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो धूरसि धूर्व धूर्व
न्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देव
हूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा ॥ ३॥ हिꣳसि
षमुरु वाताय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपाम्यग्नी ॥ ४॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

षोमाभ्यामिदं देवानामिदमु नः सह स्फात्यै त्वा नारात्यै सुवरभि विख्येषं वैश्वानरं ज्योतिर्दृꣳहन्तां
दुर्या द्यावापृथिव्योरुर्वन्तरिक्षमन्विम्यदित्यास्त्वोपस्थे सादयाम्यग्ने हव्यꣳ रक्षस्व ॥ १ ॥ मात्वाष
ट्र्चत्वारिꣳशच्च ॥ ४ ॥ देवो वः सविता त्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरापो देवीरग्रे
पुवो अग्रेगुवो ग्रं इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिंद्रो वृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्र
तूर्ये प्रोक्षितास्थाग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याꣳ शुंधध्वं दैव्याय कर्मणे देवयज्याया अव
धूतꣳ रक्षोवधूता अरातयो दित्यास्त्वगसि प्रति त्वा ॥ १ ॥ पृथिवी वेत्त्वधिषवणमसि वानस्पत्यं प्र
ति त्वा दित्यास्त्वग्वेत्त्वग्ने स्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णाम्यद्रिरसि वानस्पत्यः स इदं
देवेभ्यो हव्यꣳ सुशमि शमिष्वेष मा वदोर्जमावद धुमद्ददत्त वयꣳ संघात्तं जैष्म वर्षवृद्धमसि प्रति

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. त्वा वर्षवृद्धं वेत्तु परापूतꣳ रक्षः परापूता अरातयो रक्षसां भागोसि वायुर्वो विविनक्तु देवो वः सवि सं. प्र.
ता हिरण्यपाणिः प्रतिगृह्णातु ॥२॥ त्वा भाग एकादश च ॥५॥ अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्व १
गसि प्रति त्वा पृथिवी वेत्तु दिवस्कम्भनिरसि प्रति त्वादित्यास्त्वग्वेत्तु धिषणासि पर्वती प्रति त्वा दि
वस्कम्भनिर्वेत्तु धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यामधिवपामि धान्यमसि धिनुहि देवान्प्राणाय त्वापानाय त्वा व्यानाय त्वा दीर्घाम
नु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृह्णातु ॥१॥ प्राणाय त्वा पञ्चदश च ॥६॥ धृ
ष्टिरसि ब्रह्म यच्छापाग्नेऽग्निमामादं जहि निष्क्रव्यादꣳ सेधा देवयजं वह । निर्दग्धꣳ रक्षो निर्द
ग्धा अरातयो ध्रुवमसि पृथिवीं दृꣳह आयुर्दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूह धर्त्रमस्यं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

न्तरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳह सजातानस्मै यजमानाय पर्यूह धरुणमसि दिवं दृꣳह चक्षुः ॥१॥ दृꣳह श्रोत्रं दृꣳह स
जातानस्मै यजमानाय पर्यूह धर्मासि दिशो दृꣳह योनिं दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूह चितस्थ
प्रजामस्मै रयिमस्मै यजमानाय पर्यूह भृगूणामङ्गिरसां तपसा तप्यध्वं यानि घर्मे कपालान्युपचिन्वन्ति वेधसः
। पूष्णस्त्यान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥२॥ चक्षुरष्टाचत्वारिꣳशच्च ॥७॥ संवपामि समापो अद्भिरग्मत स
मोषधयो रसेन सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यध्वं जन
यत्यै त्वा संयौम्यग्नये त्वाग्नीषोमाभ्यां मखस्य शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतां त्व
चं गृह्णीष्वान्तरितꣳ रक्षोऽन्तरिता अरातयो देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाके ऽग्निस्ते तनुवं माति धागग्
ग्ने हव्यꣳ रक्षस्व सं ब्रह्मणा पृच्यस्वैकताय स्वाहा द्वितायस्वाहा त्रितायस्वाहा ॥३॥ सविता द्वाविꣳशति

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. ऋच्य ॥८॥ आददइंद्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयजन्योष सं. प्र.
ध्यास्ते मूलं मा हिं सिषमपहतोररुः पृथिव्यै व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां १
परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगपहतोररुः पृथिव्यै देवयजन्यै व्रजं ॥१॥
गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म
स्तमतो मा मौगपहतोररुः पृथिव्याऽअदेवयजनो व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः प
रमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा ॥२॥ मौगररुस्ते दिवं मा स्कान्वसं
वस्त्वा परिगृह्णन्तु गायत्रेण छन्दसा रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छंदसादित्यास्त्वा परिगृह्णन्तु जागतेन छं
दसा देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस ऋतमस्यृतसदनमस्यृतश्रीरसि धाऽअसि स्वधाऽअस्युर्वी चासि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुर्यामैरयंश्चंद्रमसि स्वधाभिस्तां धीरासो अनु

दृश्य यजंते ॥३॥ देवयजन्यै व्रजं तमतो मा विरप्शिन्नेकादशाच ॥९॥ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो

ग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ संमार्ज्मि वाचं प्राणं चक्षुः

श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ संमार्ज्म्याशासाना सौमनसं प्रजाꣳ सौभाग्यं त

नूं ॥ अग्नेरनुव्रता भूत्वा संनह्ये सुकृताय कं ॥ सुप्रजसस्त्वा वयꣳ सुपत्नीरुपं ॥१॥ सेदिम ॥ अग्ने सपत्न

दंभनमदब्धासो अदाभ्यं ॥ इमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः ॥ धातुश्च योनौ सुकृतस्य

लोके स्योनं मे सह पत्या करोमि ॥ समायुषा संप्रजया समग्ने वर्चसा पुनः ॥ संपत्नी पत्याहं गच्छे समात्मा त

नुवा मम ॥ महीनां पयोस्योषधीनाꣳ रसो दब्धेन त्वा चक्षुषावेक्षे सुप्रजास्त्वाय तेजोसि तेजोनुप्रेह्यग्नि

४ रसस्तस्य ते क्षीयमाणस्य निः ॥२॥ वपामि महीनां पयोस्योषधीनाꣳ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः स्तेत्तेजो मा विनैद्ग्ने जिह्वासि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुंषेयजुषे भव शुक्रमसि ज्योतिरसि सं. प्र. १
तेजोसि देवो वः सविता त्पुनात्व च्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः शुक्रं त्वा शुक्रायां धाम्नेधाम्ने
देवेभ्यो यजुंषे यजुषे गृह्णामि ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वार्चिषि धाम्नेधाम्ने देवेभ्यो यजुंषे यजुषे
गृह्णामि ॥३॥ उपनीरश्मिभिः शुक्रं ॅ षोडश्नाच ॥१०॥ कृष्णोस्याखरेष्ठोग्नये त्वा स्वाहा वेदिरसि बर्हि
षे त्वा स्वाहा बर्हिरसि स्रुग्भ्यस्त्वा स्वाहा दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा स्वधा पितृभ्य ऊर्ग्भव बर्हि
षद्भ्य ऊर्ज पृथिवीं गच्छत विष्णोस्तूपोस्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यो गन्धर्वोसि विश्वावसु
विश्वस्मादीषतो यजमानस्य परिधिरिड ईडित इन्द्रस्य बाहुरसि ॥१॥ दक्षिणो यजमानस्य परिधिरिड ईडितो
मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः सूर्यस्त्वा पुरस्तात्पातु कस्य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

श्चिदभिश्शस्त्यावीतिहोत्रं त्वाकवे द्युमन्तꣳ समिधीमह्यग्ने बृहन्तमध्वरे विष्णो यंत्रेस्थोवसूनाꣳ रुद्राणामादि
त्यानाꣳ सदसि सीद जुहूरुपभृद्ध्रुवासि घृताची नाम्ना प्रियेण नाम्ना प्रियेसदसिसीदैताअसदन्त्सुकृतस्य
लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियं ॥२॥ नाडुरसि प्रियेसदसिपंचदश च॥११
॥ भुवनमसि विप्रथस्वाग्नेयष्टरिदंनमः ॥ जुहेह्यग्निस्त्वा ह्वयति देवयज्याया उपभृदेहि देवस्त्वा सविता
ह्वयति देवयज्याया अग्नाविष्णूमावामवक्रमिषं विजिहाथां मामासंताप्तं लोकं मे लोककृतौ कृणुतं वि
ष्णोः स्थानमसीत इंद्रो अकृणोद्वीर्याणि समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिंद्रावान्त्स्वा
हा बृहद्भाः पाहिमाग्ने दुश्चरिता दामा सुचरिते भज मखस्य शिरोसि संज्योतिषा ज्योतिरंक्तां ॥३॥ अह्रुत
एकविंꣳशतिश्च ॥१२॥ वाजस्यमाप्रसवे नोद्ग्राभेणोदग्रभीत् ॥ अथासपत्नाꣳ इंद्रो मे निग्राभेणाधराꣳ

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. अकः॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्॥ अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम्॥ वसुभ्य सं. प्र.
स्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा सꣳरिहाणा वियन्तु वयः॥ प्रजां योनिं मा निर्मृक्षमाप्यायन्तामाप ओषधयो १
मरुतां पृषतयस्थ दिवं॥१॥ गच्छ ततो नो वृष्टिमेरय॥ आयुष्पा अग्नेस्यायुर्मे पाहि चक्षुष्पा अग्नेसि चक्षु
देव र्मे पाहि ध्रुवासि यं परिधिं पर्यधत्था अग्ने देवपणिभिर्वीयमाणः॥ तं त एतमनु जोषं भरामि नेदेष त्वदप
चेतयातै यज्ञस्य पाथ उप समितꣳ सꣳस्रावभागा स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च॥२॥ देवा इमां वा
चमभि विश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वम[स्मासु धुक्ष्व॥ मधुश्चुतं घृतमिव सुपूतमृतस्य नः
पतयो मृडयन्तु॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तद्] ग्नेर्वामपन्नगृहस्य सद

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰ सिस्सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातमग्ने दब्धायोऽशीततनो पाहि माद्य दिवः पाहि
प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा योनिꣳ स्वाहा देवा गातुवि
दो गातुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः ॥ ३॥ दिवं च वित्त्वा
गातुं त्रयोदश च ॥ १३॥ उभा वामिंद्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ॥ उभा दातारा विषाꣳ रयी
णामुभा वाजस्य सातये हुवे वां ॥ अश्रवꣳ हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ॥ अथा सो
मस्य प्रयती युवभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं ॥ इंद्राग्नी नवतिं पुरो दासपत्नीरधूनुतं ॥ साकमेकेन
कर्मणा ॥ शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां ॥ ३॥ उभा हि वाꣳ सुहवा जोहवीमि ता वाजꣳ स
द्य उशते धेष्ठा ॥ वयमु त्वा पथस्पते रथं न वाजसातये ॥ धिये पूषन्नयुज्महि ॥ पथस्पथः परिपतिं वचस्या

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰ कामैनकृतोअभ्यानडर्क्के ॥ सनौरासन्धुरुधश्चंद्राग्राधियंधियएंसीषधातिप्रपूषा ॥ क्षेत्रस्य पतिना सं॰
वयएंहितेनैवजयामसि ॥ गामश्वंपोषयित्न्वासनः ॥२॥ मृडातीदृशे ॥ क्षेत्रस्यपतेमधुमंत मूर्मिंधेनु प्र॰
रिवपयोअस्मासुधुक्ष्व ॥ मधुश्चुतं घृतमिवसुपूतमृतस्यनः पतयोमृडयंतु ॥ अग्नेनयसुपथारायेअ १
स्मान्विश्वानिदेव वयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठांतेनमउक्तिंविधेम ॥ आदेवा
नामपिपंथामगन्म यच्छक्नवामतदनुवोढुं ॥ अग्निर्विद्वान्त्सयजात् ॥३॥ सेदुहोतासोअध्वरान्त्स
ऋतून्कल्पयाति ॥ यद्वाहिष्ठंतदग्नयेबृहदर्चविभावसो ॥ महिषीवत्वद्रयिस्त्वद्वाजाउदीरते ॥ अग्नेत्वं
पारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा ॥ पूश्च पृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः
॥ त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा ॥ त्वंयज्ञेष्वीड्यः ॥ यत्रौवयंप्रमिनामव्रतानिविदुषांदेवाअवि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

दुष्टरासः ॥ अग्निष्टद्विश्वमापृणाति विद्वान्येभिर्देवाऽ ऋतुभिः कल्पयाति ॥ ४ ॥ जुषेथामासनोयज्ञादा
त्रयोविंशतिश्च ॥ १४॥ इषेत्वायज्ञस्य शुंधध्वंकर्मणेवांदेवोवंधूतंधृष्टिः संवपाम्यादंदे प्रत्युष्टंकृष्णो
सि भुवनमसि वाजेस्योभावांचतुर्दश ॥ १४॥ इषेद्दंह भुवनमष्टाविंशतिः ॥२८॥ हरिः ॐ ॥
॥ हरिः ॐ ॥ आपउंदंतु जीवसे दीर्घायुत्वायवर्चसओषधेत्रायस्वैनं स्वधितेमैनं हिंसी र्देवश्रू
रेतानिप्रवपेस्वस्त्युत्तराण्यशीयापोअस्मान्मातरः शुंधंतु घृतेन नो घृतपुवः पुनंतु विश्वमस्मत्प्रवहं
तुरिप्रमुदाभ्यः शुचिरापूतऐमि सोमस्यतनूरसितनुवं मे पाहि महीनां पयोसि वर्चोधा असि वर्चः ॥ १॥
मयिधेहि वृत्रस्यकनीनिकासि चक्षुष्पा असि चक्षुर्मे पाहि चित्पतिस्त्वापुनातु वाक्पतिस्त्वापुनातु दे
वस्त्वासविता पुनात्वच्छिद्रेण पवित्रेणवसोः सूर्यस्यरश्मिभिस्तस्यते पवित्रपते पवित्रेणयस्मैकं

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. पुनेतन्त्वछकेयमावौदेवास ईमहे सत्यधर्माणो अध्वरे यद्वौदेवासआगुरे यज्ञियासोहवामह इंद्रा सं.
ग्नी द्यावापृथिवी आप ओषधीस्त्वं दीक्षाणामधिपतिरसीह मासंतं पाहि ॥२॥ वर्च ओषधीरष्टौ च ॥१ प्र.
॥ आकूत्यै प्रयुजेग्नये स्वाहा मेधायै मनसेग्नये स्वाहा दीक्षायै तपसेग्नये स्वाहा सरस्वत्यै पूष्णेग्नये १/२
स्वाहापो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वंतरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा विश्वे देवस्य नेतु
मर्तौ वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहर्क्सामयोः शिल्पे स्थस्ते वामारभे ते मा ॥
१॥ पातमास्य यज्ञस्योदृचं इमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि ययाति वि
श्वा दुरिता तरेम सुतर्माणमधि नावꣳरुहेमोर्गस्यां गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा हिꣳसी
र्विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ नक्षत्राणां मातीकाशात्पाहीन्द्रस्य योनिरसि ॥२॥ मा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मा हि॑ꣳसीः कृ॒ष्यै त्वा॑ सुस॒स्यायै॑ सुपिप्प॒लाभ्य॒स्त्वौष॑धीभ्यः सूप॒स्था दे॒वो वन॒स्पति॑रू॒र्ध्वो मा॑ पा॒ह्योदृ
च॒ः स्वाहा॑ य॒ज्ञं मन॑सा॒ स्वाहा॒ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहो॒रोर॒न्तरि॑क्षा॒त्स्वाहा॑ य॒ज्ञं वाता॒दार॑भे ॥ ३ ॥ मा॒यो
नि॑रसि त्रि॒ꣳश॒च्चे ॥ २ ॥ दैवीं॒ धियं॑ मनामहे सुमृ॒डीका॑म॒भिष्ट॑ये वर्चो॒धां य॒ज्ञवा॑हस॒ꣳ सुपा॒रा नो॑ अस॒द्वशे॑
॥ ये दे॒वा मनो॒जाता मनो॒युजः॑ सु॒दक्षा॒ दक्ष॑पितार॒स्ते नः॑ पान्तु॒ ते नो॑ऽवन्तु॒ तेभ्यो॒ नम॒स्तेभ्य॒ः स्वाहाग्ने॒ त्वꣳ सु
जा॑गृहि व॒यꣳ सु॑मन्दिषीमहि गोपा॒यनः॑ स्व॒स्तये॑ प्र॒बुध॑ नः॒ पुन॑र्ददः ॥ त्वम॑ग्ने व्रत॒पा अ॑सि दे॒व आ मर्त्ये॒ष्वा ॥
त्वं ॥ १ ॥ य॒ज्ञेष्वीड्यः॑ ॥ विश्वे॑ दे॒वा अ॒भि मा माव॑वृत्रन्पू॒षा स॒न्या सो॒मो राध॑सा दे॒वः स॑वि॒ता वसो॑र्वसु॒
दा॒वा रास्वेय॑त्सो॒मा भूयो॑ भर॒ मा पृ॒णन्पू॒र्त्या वि रा॑धि॒ माहमायु॑षा च॒न्द्रम॑सि॒ मम॒ भोगा॑य भव॒ वस्त्र॑मसि॒ मम॒ भो
गा॑य भवो॒स्रासि॒ मम॒ भोगा॑य भव॒ हयो॑सि॒ मम॒ भोगा॑य भव ॥ २ ॥ छागो॑सि॒ मम॒ भोगा॑य भव मे॒षो॑सि॒ मम॒ भोगा॑य

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः

भववायवै त्वा वरुणायत्वा निर्ऋत्यै त्वा रुद्रायत्वा देवीरापो अपांनपाद्य ऊर्मिर्हविष्य इंद्रियावान्मदिंत सं. प्र. २
मस्तं वोमावक्रमिषमच्छिन्नं तंतुं पृथिव्या अनुगेषं भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वथेमव
स्यवर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीर एदमगन्म देवयजनं पृथिव्या विश्वेदेवा यदजुषंत पूर्वऋ
वसामाभ्यां यजुषा संतरंतो रायस्पोषेण समिषा मदेम ॥३॥ आत्व ऽहृयौसि ममभोगाय भवस्य पंच
वि ऽश्वातिश्च ॥३॥ इयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्या
स्ते सत्यसवसः प्रसवे वाचो यंत्रमशीय स्वाहा शुक्रमस्यमृतमसि वैश्वदेवऽहविः सूर्यस्य चक्षुरारुहमग्ने
रक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनासि धीरसि दक्षिणा ॥१॥ असि य
ज्ञियासि क्षत्रियास्यदितिरस्युभयतः शीर्ष्णी सा नः सुप्राची सुप्रतीची संभव मित्रस्त्वा पदि बध्नातु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पूषाध्वनः पात्विंद्रायाध्यक्षायानु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः सा देवि देवम
च्छेहींद्राय सोमꣳ रुद्रस्त्वा वर्त्तयतु मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि सह रय्या ॥२॥ दक्षिणा सोमं स
खा पंचंच ॥४॥ वस्व्यसि रुद्रास्यदितिरस्यादित्यासि शुक्रासि चंद्रासि बृहस्पतिस्त्वा सुम्नेरण्वतु रुद्रो वसु
भिराचिकेतु पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलिखितꣳ रक्षः परि
लिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृंतामि योस्मान्द्वेष्टि यंच वयं द्विष्म इदमस्य ग्रीवाः ॥३॥
अपिकृंतामि अस्मे रायस्त्वे रायस्तोते रायः संदेवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधा
ना वीरं विदेय तव संदृशि माहꣳ रायस्पोषेण वियोषं ॥२॥ अस्य ग्रीवा एकान्न त्रिꣳशच्च ॥५॥ अꣳशु
ना ते अꣳशुः पृच्यतां परुषा परुर्गंधस्ते काममवतु मदाय रसो अच्युतो मात्योसि शुक्रस्ते ग्रहोभि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰ त्वं देवꣳ सवितारमुण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिमूर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः॥ प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनुप्राणन्तु ॥१॥ अनु सप्त च ॥६॥ सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहꣳ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन सम्यत्ते गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः श्रयन्तामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनꣳ स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥१॥ ऊरुं द्वाविꣳशतिश्च ॥७॥ उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु॥ उर्वन्तरिक्षमन्विह्यदित्याः सदोऽस्यदि सं॰ प्र॰ २

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

त्या: सद आ सीदा स्तंभ्ना द्यामृषभो अंतरिक्ष म मिमीत वरि माणं पृथिव्या आसीद द्विश्वा भुवनानि स

म्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यंतरिक्षं ततान वाज मर्वत्सु पयो अघ्निया सु हृत्सु ॥१॥ क्रतुं

वरुणो विक्ष्वग्निं दिवि सूर्य मदधात्सोम मद्रावुदुत्यं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सूर्यं

॥ उस्रावेतं धूर्षाहाव नश्रू अवीरहणौ ब्रह्मचोदनौ वरुणस्य स्कंभनमसि वरुणस्य स्कंभसर्जनमसि

प्रत्यस्तो वरुणस्य पाशः ॥२॥ हृत्सु पंच च त्रिं २ शच्च ॥ प्रच्यवस्व भुवस्पते विश्वान्यभिधामानि

मात्वा परि परी विदन्मा त्वा परिपंथिनो विदन्मा त्वा वृका अघायवो मा गंधर्वो विश्वावसुरादघ च्छ्ये

नो भूत्वा परापत यजमानस्य नो गृहे देवैः सं २ स्कृतं यजमानस्य स्वस्त्ययन्यस्यपि पंथामगस्म

हि स्वस्ति गामनेहसं येन विश्वाः परि द्विषो वृणक्ति विंदते वसु नमो मित्रस्य वरुणस्य चक्षसे मह्रो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. देवायतद्दृतꣳसपर्यतदूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशꣳसतवरुणस्यस्कंभनमसि सं.

वरुणस्यस्कंभसर्जनमस्युन्मुक्तोवरुणस्यपाशः ॥३॥ मित्रस्यत्रयोविꣳशतिश्च ॥९॥ अग्नेरा प्र. २

तिथ्यमसि विष्णवेत्वासोमस्यातिथ्यमसि विष्णवेत्वातिथेरातिथ्यमसि विष्णवेत्वाग्नयेत्वा

रायस्पोषदाव्ने विष्णवेत्वाश्येनायत्वासोमभृते विष्णवेत्वायातेधामानिहविषायजन्तितातेवि

श्वापरिभूरस्तुयज्ञंगयस्फानःप्रतरणःसुवीरोवीरहाप्रचरासोमदुर्यानदित्याःसदोस्यदित्याः

सदआ ॥३॥ सीदवरुणोसिधृतव्रतोवारुणमसिशंयोर्देवानाꣳसख्यान्मादेवानामपसश्छित्स्म

स्यापतयेत्वागृह्णामि परिपतयेत्वागृह्णामितनूनप्त्रेत्वागृह्णामिशाक्वरायत्वागृह्णामिशक्मन्नोजिष्ठा

यत्वागृह्णाम्यनाधृष्टमस्यनाधृष्यंदेवानामोजोभिशस्तिपाअनभिशस्तेन्यमनुमेदीक्षांदीक्षापति

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

र्मन्यतामनुतपस्तपस्पतिरंजसासत्यमुपगेषꣳसुवितेमाधाः ॥२॥ आमेकंच ॥१०॥ अꣳशुरꣳशुस्तेदेव
सोमाप्यायतामिंद्रायैकधनविद आतुभ्यमिंद्रः प्यायतामात्वमिंद्रायप्यायस्वाप्यायययसखीन्त्सन्यामे
धयास्वस्तितेदेवसोमसुत्यामशीयेष्टारायः प्रेषेभगायर्त्तमृतवादिभ्योनमोदिवेनमः पृथिव्याअ
ग्नेव्रतपतेत्वंव्रतानांव्रतपतिरसियाममतनूरेषासात्वयि ॥१॥ यातवतनूरियꣳसामयिसहनौ
व्रतपतेव्रतिनोर्व्रतानियातेअग्नेरुद्रियातनूस्तयानः पाहितस्यास्तेस्वाहायातेअग्नेयाशया
रजाशयाहराशयातनूर्वर्षिष्ठागह्वरेष्ठोग्रंवचोअपावधींत्वेषंवचोअपावधीꣳस्वाहा ॥२॥ त्वयि
चत्वारिꣳशच्च ॥११॥ वित्तायनीमेसितिक्तायनीमेस्यवतान्मानाथितमवतान्माव्यथितंवि
देरग्निर्नभोनामाग्नेअंगिरोयोस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनामयज्ञियंतेन
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri
त्वादधेग्नेअंगिरोयोद्वितीयस्यांतृतीयस्यांपृथिव्यामस्यायुषानाम्नेहियत्तेनाधृष्टंनाम ॥१॥ यज्ञियंतेन

यजु. त्वा द॑धे सि॒ ꣳ ह्री र॑सि म॒हि॒षी र॑स्युरु॒प्र॑थस्वो॒रु ते॑ य॒ज्ञप॑तिः प्रथतां ध्रु॒वा सि॑ दे॒वेभ्य॑ः शुंधस्व दे॒वेभ्य॑ः सं. प्र.
शुंभस्वेंद्र घो॒षस्त्वा वसु॑भिः पु॒रस्ता॑त्पा॒तु मनो॑जवास्त्वा पि॒तृभि॑र्दक्षिण॒तः पा॑तु प्रचे॑तास्त्वा रु॒द्रैः प॒ २
श्चात्पा॑तु वि॒श्वक॑र्मा त्वादि॒त्यै रु॑त्तर॒तः पा॑तु सि॒ ꣳ ह्री र॑सि सपत्न सा॒ही स्वाहा॑ सि॒ ꣳ ह्री र॑सि सुप्रजा॒व
नि॒ स्वाहा॑ सि॒ ꣳ ह्रीः ॥ २॥ अ॒सि॒रा॒यस्पो॑ष॒व॒नि॒ स्वाहा॑ सि॒ ꣳ ह्री र॑स्यादि॒त्य॒व॒नि॒ स्वाहा॑ सि॒ ꣳ ह्री र॒स्याव
ह॒ दे॒वां दे॑वय॒ते यज॑मानाय॒ स्वाहा॑ भू॒तेभ्य॑स्त्वा वि॒श्वायु॑रसि पृथि॒वीं दृ॑ꣳह ध्रु॒व॒क्षिद॑स्यं॒तरि॑क्षं दृ॒ꣳ
हा॒च्यु॒त॒क्षिद॑सि॒ दिवं॑ दृ॒ꣳहा॒ग्ने र्भस्मा॑स्य॒ग्नेः पुरी॑षमसि ॥ ३॥ नाम॑ सुप्रजा॒व॒नि॒ स्वाहा॑ सि॒ ꣳ ह्रीः पंच
त्रिꣳ शच्च ॥ १२॥ युं॒ज॒ते मन॑ उ॒त यु॑ंजते॒ धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चितः॑ ॥ वि होत्रा॑ दधे वयु
ना॒वि॒दे॒क॒ इन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः ॥ सु॒वाग्दे॑व॒ दु॒र्या॒ꣳ आ व॑द दे॒व॒श्रुतौ॑ दे॒वे॒ष्वा घो॑षेथा॒

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मानो वीरो जायतां कर्मण्यो यꣳ सर्वेनुजीवाम यो बहूनामसद्वशी ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे

पदं ॥ समूढमस्य ॥ १ ॥ पाꣳसुर इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये ॥ व्यस्क

भ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः ॥ प्राचीप्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नय

तं मा जीह्वरत मत्र रमेथां वर्ष्मन्पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वान्तरिक्षाद्धस्तौ

पृणस्व बहुभिर्वसव्यैरा प्रयच्छ ॥ २ ॥ दक्षिणादोत सव्यात् ॥ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवा

नि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि वि

ष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ ३ ॥ अ

स्य यच्छैकां न चत्वारिꣳशच्च ॥ १३ ॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाꣳ इभेन ॥ तृष्वीम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. नुप्रसितिंद्रूणानोस्तासि विध्यंरक्षसस्तपिष्ठैः ॥ तवंभ्रमासआशुयापतंत्यनुस्पृश धृषताशोशुचानः सं.
॥ तपूꣳष्यग्नेजुह्वा पतंगानसंदितो विसृज विष्वगुल्काः ॥ प्रतिस्पशो विसृजतूर्णितमो भवापायुर्वि प्र.
शोअस्या अदब्धः ॥ योनो दूरे अघशꣳसः ॥१॥ योअंत्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ उदग्नेतिष्ठ २
प्रत्यातनुष्व न्यमित्राꣳ ओषतात्तिग्महेते ॥ योनोअरातिꣳ समिधानचक्रे नीचातंधक्ष्यतसंनशुष्कं ॥
ऊर्ध्वोभव प्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरातनुहियातुजूनांजामिमजामिं
प्रमृणीहि शत्रून् ॥ सत्ते ॥२॥ जानातिसुमतिंयविष्ठ यईवतेब्रह्मणेगातुमैरत् ॥ विश्वान्यस्मैसुदिनानि
रायोद्युम्नान्यर्यो विदुरोअभिद्यौत् ॥ सेदग्नेअस्तुसुभगः सुदानुर्यस्त्वानित्येनहविषायउक्थैः ॥ पि
प्रीषतिस्वआयुषिदुरोणे विश्वेदस्मैसुदिनासासदिष्टिः ॥ अर्चामि तेसुमतिं घोष्यर्वाक्संतेवावाताजर

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

॥१२॥

त्वां ॥ ३ ॥ द्वयंगीः ॥ स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ इहत्वा भूर्याचरेदुपत्मं
दोषावस्तर्दीदिवाꣳसमनु द्यून् ॥ क्रीडंतस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवाꣳसो जनानां ॥ यस्त्वा
स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ॥ तस्य त्राता भवसि तस्य सखा यस्त आतिथ्य मानुषक्जु
जोषत् ॥ महोरुजामि ॥ ४ ॥ बंधुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ॥ त्वंनो अस्य वचसश्चिकिद्धि
होतर्यविष्ठ सुक्रतो दमूनाः ॥ अस्वप्नजस्तरणयः सुशेवा अतंद्रासो वृका अश्रमिष्ठाः ॥ ते पायवः सध्रि
यंचो निषद्याग्ने तव नः पांत्वमूर ॥ ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन् ॥ ररक्षतान्सु
कृतो विश्ववेदा दिप्संत इद्रिपवो नाह ॥ ५ ॥ देभुः ॥ त्वया वयꣳसधन्यस्त्वोतास्तव प्रणीत्यश्याम वा
जान् ॥ उभा शꣳसा सूदय सत्यताते नुष्ठुया कृणुह्यह्रयाण ॥ अया ते अग्ने समिधा विधेम प्रति स्तो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. मेꣳशस्यमानंगृभाय॥ दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदोमित्रमहोअवद्यात्॥ रक्षोहणंवाजिन सं.
माजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म॥ शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवा ॥६॥ सरिषःपा प्र.
तुनक्तं॥ विज्योतिषाबृहताभात्यग्निराविर्विश्वानिकृणुतेमहित्वा॥ प्रादेवीर्मायाःसहतेदुरेवाःशि २
शीतेशृंगेरक्षसेविनिक्षे॥ उतस्वानासोदिविषंत्वग्नेस्तिग्मायुधारक्षसेहंतवाउ॥ मदेचिदस्यप्ररुजं
तिभामानवरंतेपरिबाधोअदेवीः॥७॥ अघशंसःसतेनरताꣳरुजामिहृदिवैकचत्वारिꣳशच्च॥
१४॥ आपउंदंत्वाकृत्यैदेवीमियंतेवस्व्यंस्यꣳशुनातेसोमंतउदायुषाप्रच्यवस्वाग्नेरातिथ्यमꣳशुरꣳ
शुर्विन्नायनीमेसियुंजतेकृणुष्वपाजश्चतुर्दश॥१४॥ आपोवस्व्यसियातवेयंगीश्चतुस्त्रिꣳशत्॥
हरिःॐ॥ ॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

हरिः ॐ ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामाददेभ्रिरसिनारिरसिपरिलिखितꣳर
क्षःपरिलिखिताअरातयइदमहꣳरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइदमस्यग्रीवाअपिकृं
तामिदिवेत्वांतरिक्षायत्वापृथिव्यैत्वाशुंधंतांलोकःपितृषदनोयवोसियवयास्मद्द्वेषः ॥१॥ यवयारातीःपितृणा
ꣳसदनमस्युद्दिवꣳस्तभानांतरिक्षंपृणपृथिवींदृꣳहद्युतानस्त्वामारुतोमिनोतुमित्रावरुणयोर्ध्रुवेणधर्मणाब्रह्मव
नित्वाक्षत्रवनिꣳसुप्रजावनिꣳरायस्पोषवनिंपर्यूहामिब्रह्मदृꣳहक्षत्रंदृꣳहप्रजांदृꣳहरायस्पोषंदृꣳहघृतेनद्यावा
पृथिवीआपृणेथामिंद्रस्यसदोसिविश्वजनस्यछायापरित्वागिर्वणोगिरइमाभवंतुविश्वतोवृद्धायुमनुवृद्धयोजुष्टाभ
वंतुजुष्टयइंद्रस्यस्यूरसीन्द्रस्यध्रुवमस्यैंद्रमसि ऐंद्रायत्वा ॥२॥ द्वेषइमाअष्टादशाच ॥१॥ रक्षोहणोवलगहनोवैष्णवान्
खनामीदमहंतंवलगमुद्वपामियंनःसमानोयमसमानोनिचखानेदमेनमधरंकरोमियोनःसमानोयोसमानोरातीय

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. तिं गायत्रेण छंदसावंबाढो वलगः किमत्र भद्रं तंनौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा सं. प्र. ३
विश्वाराडसि विश्वासां नाष्ट्राणां ऽहंता ॥ १ ॥ रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणौ वलगहनो वनयामि वै
ष्णवान्यवोसि यवयास्मद्द्वेषो यवयारातीरक्षोहणो वलगहनो वस्तृणामि वैष्णवान्रक्षोहणौ वलगहनोभिजुहोमि
वैष्णवान्रक्षोहणौ वलगहनावुपदधामि वैष्णवीरक्षोहणौ वलगहनौ पर्यूहामि वैष्णवीरक्षोहणौ वलगहनोपरिस्तृ
णामि वैष्णवीरक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिंद्राय वाचंवद ॥ २ ॥ हंतेंद्रायद्वेच ॥ २ ॥
विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोसि प्रचेतास्तुथोसि विश्ववेदा उशिगसि कविरंघारिरसि बंभारिर
वस्युरसि दुवस्वां छुंध्यूरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योसि पवमानः प्रतक्वासि नभस्वानसंमृष्टोसि ह
व्यसूदं ऋतधामासि सुवर्ज्योतिर्ब्रह्मज्योतिरसि सुवर्धामाजोस्येकपादहिरसि बुध्नियो रौद्रेणानीकेन पाहि मा
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पिपृहि॒मा॒मामा॑हिꣳसीः ॥१॥ अनी॑केना॒ष्टौ च ॥३॥ त्वꣳ सो॑म तनू॒कृद्भ्यो॒ द्वेषो॑भ्यो॒ऽन्यकृ॑तेभ्य उ॒रु य॒न्तासि॒ वरू॑थꣳ

स्वाहा॑ जुषा॒णो अ॒प्तुरा॒ज्यस्य वे॑तु॒ स्वाहा॒यम्नो॑ अ॒ग्निर्वरि॑वः कृणो॒त्वयं मृधः॑ पु॒र ए॑तु प्रभि॒न्दन् ॥ अ॒यꣳ शत्रू॑ञ्जय॒तु जर्हृ॑

षाणो॒ऽयं वाजं॑ जयतु॒ वाज॑साते ॥ उ॒रु वि॑ष्णो॒ विक्र॑मस्वो॒रु क्षया॑य नः कृधि ॥ घृ॒तं घृ॑तयोने पिब॒ प्रप्र॑ य॒ज्ञप॑तिं तिर ॥ सोमो॑

जिगाति गातु॒वित् ॥१॥ दे॒वाना॑मेति निष्कृ॒तमृ॒तस्य॒ योनि॑मा॒सद॒मदि॑त्याः सदो॒ऽस्यदि॑त्याः॒ सद॒ आसी॑दै॒ष वो॑ देव स

वितः सोम॒स्तꣳ र॑क्षध्वं॒ मा वो॑ दभदे॒तत्त्वꣳ सो॑म दे॒वो दे॒वानुपा॑गा इ॒दम॒हं म॑नु॒ष्यो॑ मनु॒ष्या॑न्स॒ह प्र॒जया॑ स॒ह रा॒यस्पो॑

षे॒ण नमो॑ दे॒वेभ्यः॑ स्व॒धा पि॒तृभ्य॑ इ॒दम॒हं निर्वरु॑णस्य॒ पाशा॒त्सुव॑र॒भि ॥२॥ वि॑ख्येषं वैश्वान॒रं ज्योति॒रग्ने॑ व्रतपते

त्वं व्र॒ताना॑ व्र॒तप॑तिरसि॒ या मम॑ त॒नूस्त्वय्य॒भू॑दि॒यꣳ सा मयि॒ या त॑व त॒नूर्मय्य॒भू॑दे॒षा सा त्वयि॑ यथाय॒थं नौ॑ व्र

तपते व्र॒तिनो॑र्व्र॒तानि॑ ॥३॥ गातु॒विद्भ्य॒ एके॑ त्रिꣳशच्च ॥४॥ अत्य॒न्याँ अगां॒ नान्याँ उपा॑गाम॒र्वाक्त्वा॒ परै॑रविदं प॒

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः

रोर्वरैस्स्तं त्वा जुषेवैष्णवं देवयज्यायै देवस्त्वा सविता मध्वानक्त्वोषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीर्दिव सं. प्र. ३
मग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीः पृथिव्या संभव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ
रुहेम यं त्वायꣳ स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायाच्छिन्नो रायः सुवीरः ॥१॥ यं दश च ॥ ५ ॥ पृ
थिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो यवयारातीः पितृणाꣳ सदन
मसि स्वावेशोऽस्यग्रेगा नेतृणां वनस्पतिरधि त्वा स्थास्यति तस्य वित्ताद्देवस्त्वा सविता मध्वानक्तु सुपिप्पला
भ्यस्त्वौषधीभ्य उद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवीमुपरेण दृꣳह ते ते धामान्युश्मसि ॥१॥ गमध्ये गावो
यत्र भूरिशृंगा अयासः ॥ अत्राह तदुरुगायस्य विष्णोः परमं पदमव भाति भूरेः ॥ विष्णोः कर्माणि पश्यत यतो
व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदꣳ सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ ब्रह्म

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

वनिंत्वाक्षत्रवनिं॒ सुप्रजावनिं॒ रायस्पोषवनिंपर्यूहामिब्रह्म दृ॒ꣳह क्षत्रंदृ॒ꣳह प्रजांदृ॒ꣳह रायस्पोषंदृ॒ꣳह परिवी

रसिपरित्वादेवी र्विशोव्ययंतांपरीम॒ रायस्पोषोयजमानंमनुष्याअंतरिक्षस्य त्वासानावबंगूहामि ॥२॥ उ

रमसीपोषमेकान्नविं॒ इतिश्रं ॥ ६ ॥ इषेत्वोपवीरस्युपोदेवान्देवीविशः प्रागुर्वह्नीरुशिजोबृहस्पतेधारयावसू

नि हव्यातेस्वदंतांदेवत्वष्टर्वसुरण्वरेवतीरमध्वमग्नेर्जनित्रमसिवृषणौस्थउर्वश्यस्यायुरसिपुरूरवाघृते

नाक्तेवृषणंदधाथांगायत्रंछंदोनुप्रजायस्वत्रैष्टुभंजागतंछंदोनुप्रजायस्वभवतं ॥१॥ नः समनसौसमो

कसावरेपसौ ॥ मायज्ञꣳहिꣳसिष्टंमायज्ञपतिंजातवेदसौशिवौभवतमद्यनः ॥ अग्नावग्निश्चरतिप्रविष्ट

ऋषीणांपुत्रोअधिराजएषः ॥ स्वाहाकृत्यब्रह्मणातेजुहोमिमादेवानांमिथुयाकर्भागधेयं ॥ २ ॥ भवतंमेकत्रिꣳशा

च ॥ ७ ॥ आददऋतस्यत्वादेवहविः पाशेनारभेधर्षामानुषानद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यपांपेरुरसिस्वा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु.

त्वचित्सद्देव ꣳ हव्यमापो देवीः स्वदंत्वेन ꣳ संते प्राणो वायुना गच्छताꣳ संयजत्रैरंगानि संयज्ञपतिराशि सं. प्र. ३

षा घृतेनाक्तौ पशुंस्त्रायेथा ꣳ रेवती यज्ञपतिं प्रियधा विशतोरो अंतरिक्षसजूर्देवेन ॥१॥ वातेनास्य हविष

स्त्मनो यज समस्य तनुवो भव वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः पृथिव्याः संपृचः पाहि नमस्त आतानान

र्वा प्रेहि घृतस्य कुल्या मनु सह प्रजया सह रायस्पोषेणापो देवीः शुद्धायुवः शुद्धा यूयं देवा ꣳ ऊढ्व ꣳ शुद्धाव

यं परिविष्टाः परिवेष्टारो वो भूयास्म ॥२॥ देवेन चतुश्चत्वारि ꣳ शाच्च ॥३॥ वाक्त आप्यायतां प्राणस्त आ

प्यायतां चक्षुस्त आप्यायता ꣳ श्रोत्रं त आप्यायतां या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थि

तं तत्त आप्यायतां तत्त एतेन शुंधतां नाभिस्त आप्यायतां पायुस्त आप्यायता ꣳ शुद्धाः चरित्राः शमद्भ्यः

॥४॥ शमोषधीभ्यः शं पृथिव्यै शमहोभ्यामोषधे त्रायस्वैन ꣳ स्वधिते मैन ꣳ हिंसी रक्षसां भागोसीदमह ꣳ र

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

क्षौधमंतमोंनयामि यौस्मांद्वेष्टि यंचंवयंद्विष्म इदमैंनमधमंतमोंनयामीषेत्वाघृतेनेद्यावापृथिवीप्रोर्णुवाथा

मच्छिन्नोरायःसुवीरउर्वंतरिक्षमन्विहिवायोवीहिस्तोकानाऽस्वाहोर्ध्वनभसंमारुतंगच्छतं ॥२॥

अङ्गोवीहिपंचंच ॥९॥ संतेमनसामनःसंप्राणेनप्राणोजुष्टंदेवेभ्योहव्यंघृतवत्स्वाहैंद्रःप्राणो अंगे

अंगेनिदेध्यदैंद्रोपानोअंगेअंगेविबोभुवद्देवत्वष्टभूरितेसऽसमेतुविषुरूपायत्सलक्ष्माणोभवं

श्वदेवत्रायंतमवसेसखायोनुत्वामातापितरौमदंतुश्रीरस्यग्निस्त्वाश्रीणात्वापःसमरिणन्वातस्य

॥३॥ त्वाध्रज्यैपुष्णोरऽह्याअपामोषधीनाऽरोहिष्यैघृतंघृतपावानःपिबतवसांवसापावानःपिब

तांतरिक्षस्यहविरसिस्वाहात्वांतरिक्षायदिशःप्रदिशआदिशोविदिशउद्दिशःस्वाहादिग्भ्योन

मोदिग्भ्यः ॥२॥ वातस्याष्टाविऽशतिश्च ॥१०॥ समुद्रंगच्छस्वाहांतरिक्षंगच्छस्वाहादेवऽसवि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. तारंगच्छस्वाहाहोरात्रेगच्छस्वाहामित्रावरुणौगच्छस्वाहासोमंगच्छस्वाहायज्ञंगच्छस्वाहाछंदाꣳ सं. प्र.
सिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहानभोदिव्यंगच्छस्वाहाग्निंवैश्वानरंगच्छस्वाहाद्भ्यस्त्वौषधी ३
भ्योमनोमेहार्दियच्छतनूंत्वचंपुत्रंनप्तारमशीयशुगसितमभिशोचयोस्मांद्वेष्टियंचवयंद्विष्मो
धाम्नोधाम्नोराजंनितोवरुणनोमुंचयदापोअघ्न्यावरुणेतिशपामहेततोवरुणनोमुंच॥१॥असिव
द्विꣳशतिश्च॥११॥हविष्मतीरिमाआपोहविष्मान्देवोअध्वरोहविष्माꣳआविवासतिहविष्माꣳ
अस्तुसूर्यः॥अग्नेर्वोपन्नगृहस्यसदसिसादयामिसुम्नायसुम्निनीःसुम्नेमाधत्तेंद्राग्नियोर्भाग
धेयीस्थमित्रावरुणयोर्भागधेयीस्थविश्वेषांदेवानांभागधेयीस्थयज्ञेजागृत॥१॥हविष्मतीश्चनु
स्त्रिꣳशत्॥१२॥हृदेत्वामनसेत्वादिवेत्वासूर्यायत्वोर्ध्वमिममध्वरंकृधिदिविदेवेषुहोत्रायच्छसो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मेराजन्नेस्यवरोह माभेर्मासंविक्थामात्वाहिंꣳसिषंप्रजास्त्वमुपावरोह प्रजास्त्वामुपावरोहंनुशृणोत्वग्निः
समिधाहवंमेशृण्वंत्वापोधिषणाश्चदेवीः ॥ शृणोतग्रावाणोविदुषोनु ॥१॥ यज्ञꣳशृणोतुदेवःसविताह
वंमे ॥ देवीरापोअपांनपाद्यऊर्मिर्हविष्यइंद्रियावान्मदिंतमस्तंदेवेभ्योदेवत्राधत्तशुक्रꣳशुक्रपेभ्यो
येषांभागस्थस्वाहाकार्षिरस्यपापांमृध्रꣳसमुद्रस्यवोक्षित्याउन्नये ॥ यमग्नेपृत्सुमर्त्यमावोवाजेषु
यंजुनाः ॥ सयंताशश्वतीरिषः ॥२॥ नुसप्तचत्वारिꣳशच्च ॥१३॥ त्वमग्नेरुद्रोअसुरोमहोदिवस्त्व
ꣳशर्धोमारुतंपृक्षईशिषे ॥ त्वंवातैररुणैर्यासिशंगयस्त्वंपूषाविधतःपासिनुत्मना ॥ आवोराजानमध्वरस्य
रुद्रꣳहोतारꣳसत्ययजꣳरोदस्योः ॥ अग्निंपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वं ॥ अग्निर्होता
निषसादायजीयानुपस्थेमातुःसुरभावुलोके ॥ युवाकविःपुरुनिष्ठः ॥१॥ ऋतावाधर्ताकृष्टीनामुतम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः ध्व्यंइद्धः ।। साध्वीमकर्देववीतिंनो अद्य यज्ञस्य जिह्वामविदाम गुह्यां ।। स आयुरागात्सुरभिर्वसानो सं. प्र.
भद्रामकर्देवहूतिं नो अद्य ।। अक्रंददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन् ।। सद्यो जज्ञानो ३
वि हीमिद्धो अख्यदा रोदसी भानुना भात्यंतः ।। त्वे वसूनि पुर्वणीक ।।२।। होतर्दोषावस्तोरेरिरे यज्ञि
यासः ।। क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ।। तुभ्यं ता अंगिरस्तम विश्वाः सुक्षि
तयः पृथक् ।। अग्ने कामाय येमिरे ।। अश्याम तं काममग्ने तवोत्यश्याम रयिं रयिवः सुवीरं ।। अश्याम वा
जमभि वाजयंतोऽश्याम द्युम्नमजराजरं ते ।। श्रेष्ठं यविष्ठ भारताग्ने द्युमंतमा भर ।। ३।। वसो पुरुस्पृहं र
यिं ।। स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।। यः पावकः पुरुतमः पुरूणि पृथून्यग्नि
रनुयाति भर्वन् ।। आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।। पुनस्ते प्राण आयति परा यक्ष्मं सुवामि ते ।।

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि ॥ घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि ॥ ४ ॥ रक्ष
तादिमं ॥ तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे ॥ अग्ने जनामि सुष्टुतिं ॥ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वि
तीयं परि जातवेदाः ॥ तृतीयमप्सु नृमणा अजस्रमिंधान एनं जरते स्वाधीः ॥ शुचिः पावक वंद्यो ग्ने बृहद्विरो
चसे ॥ त्वं घृतेभिराहुतः ॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ॥ अग्निरमृतो अभवद्वयोभिः ॥ ॥ य
देनं द्यौरजनयत्सुरेताः ॥ आयदिषे नृपतिं तेज आनट् शुचिरेतो निषिक्तं द्यौरभीके ॥ अग्निः शर्धमनवद्यं युवा
नं स्वाधियं जनयत्सूदयच्च ॥ स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ॥ अग्ने रायो नृतम
स्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥ अग्ने सहंतमा भर द्युम्नस्य प्रासहा रयिं ॥ विश्वा यः ॥ ६ ॥ चर्षणीरभ्या
सा वाजेषु सासहत् ॥ तमग्ने पृतनासहं रयिं सहस्व आभर ॥ त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. ॥उक्षान्नायवशान्नायसोमपृष्ठायवेधसे॥स्तोमैर्विधेमाग्नये॥वद्माहिसूनो अस्यद्मसद्वाचक्रेअग्निर्ज सं. प्र. ३
नुषाज्मान्नं ॥सत्वंनऊर्जसन ऊर्जंधाराजेवजेरवृकेक्षेष्यन्तः॥अग्नआयूंषि ॥७॥पवसआसुवोर्जमिषं
चनः॥आरेबाधस्वदुच्छुनां॥अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यं॥दधत्पोषंरयिंमयि॥अग्नेपावक
रोचिषामन्द्रयादेवजिह्वया॥आदेवान्वक्षियक्षिच॥सनःपावकदीदिवोग्नेदेवांइहावह॥उपयज्ञंहविश्च
नः॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः॥शुचीरोचतआहुतः॥उदग्नेशुचयस्तवशुक्राभ्राजन्तई
रते॥तवज्योतींष्यर्चयः ॥८॥ पुरुनिष्ठः पुर्वणीकभराभिवयोभिर्यआयूंषिविप्रःशुचिश्चतुर्दशाच॥१
४॥ देवस्यरक्षोहणोविभूस्त्वंसोमात्यन्यानगांपृथिव्याइषेत्वाददेवाग्नेसंतेसमुद्रंहविष्मतीर्हृदे
त्वमग्नेरुद्रश्चतुर्दश॥१४॥देवस्यगमध्यैहविष्मतीः पवसएकत्रिंशात् ॥३१॥ हरिः ॐ ॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

॥हरिः ॐ॥ आददे ग्रावास्यध्वरकृद्देवेभ्यो गंभीरमिममध्वरंकृध्युत्तमेनपविनेंद्रायसोमꣳसुषुतंमधुमंतंपयस्वंतंवृष्टिवनिमिंद्रायत्वावृत्रघ्नइंद्रायत्वावृत्रतरइंद्रायत्वाभिमातिघ्नइंद्रायत्वादित्यवंतइंद्रायत्वाविश्वदेव्यावतेश्वात्रास्थवृत्रतुरोराधोगूर्त्ताअमृतस्यपत्नीस्ता देवीर्देवत्रेमंयज्ञंधत्तोपहूताःसोमस्यपिबतोपहूतोयुष्माकं॥१॥सोमः पिबतुयत्तेसोमदिविज्योतिर्यत्पृथिव्यांयदुरावंतरिक्षेतेनास्मैयजमानायोरुरायाकृध्यधिदात्रेवोचोधिषणेवीडूसतीवीडयेथामूर्जंदधाथामूर्जंमेधत्तंमावाꣳहिꣳसिषंमामाहिꣳसिष्टंप्रागपागुदगधराक्तास्त्वादिशआधावंत्वंबनिष्वर॥ यत्तेसोमादाभ्यंनामजागृवितस्मैतेसोमसोमायस्वाहा॥२॥युष्माकꣳस्वरुयत्तेनवंच॥१॥वाचस्पतयेपवस्ववाजिन्वृषावृष्णोअꣳशुभ्यांगभस्तिपूतोदेवोदेवानांपवित्रमसियेषांभागोसितेभ्यस्त्वास्वाकृतोसिमधुम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. तीर्न्नइषंस्कृधि विश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यः पार्थिवेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहि स्वाहात्वासुभ सं.
वः सूर्याय देवेभ्यस्त्वामरीचिपेभ्य एषतेयोनिः प्राणायत्वा ॥१॥ वाचः सप्तचत्वारिंशत् ॥२॥ उप प्र.
यामगृहीतोस्यंतर्यच्छमघवन्पाहिसोमंमुरुष्यरायः समिषोयजस्वांतस्तेदधामि द्यावापृथिवीअं ४
तरुर्वंतरिक्षंसजोषादेवैरवरैः परैश्चांतर्यामेमघवन्मादयस्वस्वांकृतोसिमधुमतीर्न्नइषस्कृधिवि
श्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यः पार्थिवेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहि स्वाहात्वासुभवः सूर्यायदेवेभ्य
स्त्वामरीचिपेभ्य एषतेयोनिरपानायत्वा ॥१॥ देवेभ्यः सप्तच ॥३॥ आवायोभूषशुचिपाउपनः
सहस्रंतेनियुतोविश्ववार ॥ उपोतेअंधोमद्यमयामियस्यदेवदधिषेपूर्वपेयं ॥ उपयामगृहीतोसिवायवे
त्वेंद्रवायूइमेसुताः ॥ उपप्रयोभिरागतमिंदवोवामुशंतिहि ॥ उपयामगृहीतोसींद्रवायुभ्यांत्वैषतेयोनिः स

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ज्रोषांभ्यांत्वा॥ आवांयोन्निश्चत्वारिं॑शत्॥४॥ अयंवांमित्रावरुणासुतः सोमंऋतावृधा॥ ममेदिहश्रुत॑ꣳ

हवं॥ उपयामगृहीतोसिमित्रावरुणाभ्यां त्वैषतेयोनिर्ऋतायुभ्यां त्वा॥ अयंवां विꣳशतिः॥ ५॥ यावांकशाम

धुमत्यश्विनासूनृतावती॥ तयायज्ञंमिमिक्षतं॥ उपयामगृहीतोस्यश्विभ्यांत्वैषतेयोनिर्माध्वीभ्यां त्वा॥ या

वांमष्टादश॥६॥ प्रातर्युजौविमुच्येथामश्विनावेहगच्छतं॥ अस्यसोमस्यपीतये॥ उपयामगृहीतोस्यश्विभ्यां

त्वैषतेयोनिरश्विभ्यांत्वा॥ प्रातर्युजावेकान्नविंꣳशतिः॥७॥ अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसो

विमाने॥ इममपाꣳसंगमेसूर्यस्यशिशुंनविप्रामतिभीरिहंति॥ उपयामगृहीतोसिशंडायत्वैषतेयोनिर्वीरतांपाहि

॥ अयंवेनः पंचविꣳशतिः॥८॥ तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदꣳसुवर्विदं प्रतीचीनंवृज

नंदोहसेगिराशुंजयंतमनुयासुवर्धसे॥ उपयामगृहीतोसिमर्कायत्वैषतेयोनिः प्रजाः पाहि॥ तंप्रत्नथाष

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

जुः

द्विꣳशतिः ॥ ९॥ येदेवादिव्येकादशस्थपृथिव्यामध्येकादशस्थाप्सुषदोमहिनैकादशस्थतेदेवायज्ञमि सं. प्र.
मंजुषध्वमुपयामगृहीतोस्याग्रयणोसिस्वाग्रयणोजिन्वयज्ञंजिन्वयज्ञपतिमभिसवनापाहिविष्णुस्त्वां ४
पातुविशंत्वंपाहींद्रियेणैषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ येदेवास्त्रिचत्वारिꣳशत् ॥१०॥ त्रिꣳशत्त्रय
श्चगणिनोरुजंतोदिवꣳरुद्राःपृथिवींचसचंते ॥ एकादशासोअप्सुषदःसुतꣳसोमंजुषंताꣳसवनायविश्वे ॥
उपयामगृहीतोस्याग्रयणोसिस्वाग्रयणोजिन्वयज्ञंजिन्वयज्ञपतिमभिसवनापाहिविष्णुस्त्वांपातुविशं
त्वंपाहींद्रियेणैषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ त्रिꣳशद्विचत्वारिꣳशत् ॥११॥ उपयामगृहीतोसींद्राय
त्वाबृहद्वतेवयस्वतउक्थायुवेयत्तइंद्रबृहद्वयस्तस्मैत्वाविष्णवेत्वैषतेयोनिरिंद्रायत्वोक्थायुवे ॥ उप
यामगृहीतोद्वाविꣳशतिः ॥१२॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविꣳसम्राज

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

मतिथिंजनानामासन्नापात्रंजनयंतदेवाः॥ उपयामगृहीतोस्यग्नयेत्वावैश्वानरायध्रुवोसि ध्रुवक्षितिर्ध्रुवाणां
ध्रुवतमोच्युतानामच्युतक्षित्तमएषतेयोनिरग्नयेत्वावैश्वानराय॥ मूर्धानंपंचत्रिंꣳशत्॥ १३॥ मधुश्च मा
धवश्चशुक्रश्चशुचिश्चनभश्चनभस्यश्चेषश्चोर्जश्चसहश्चसहस्यश्चतपश्चतपस्यश्चोपयामगृहीतोसिसꣳ
सर्पोस्यꣳहस्पत्यायत्वा॥ मधुस्त्रिꣳशत्॥१४॥ इंद्राग्नीआगतꣳसुतंगीर्भिर्नभोवरेण्यं॥ अस्यपातंधियेषि
ता॥ उपयामगृहीतोसीन्द्राग्निभ्यांत्वैषतेयोनिरिंद्राग्निभ्यांत्वा॥ इंद्राग्नीविꣳशतिः॥१५॥ ओमासश्चर्षणी
धृतोविश्वेदेवासआगत॥ दाश्वाꣳसोदाशुषःसुतं॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यएषतेयोनिर्विश्वे
भ्यस्त्वादेवेभ्यः॥ ओमासोविꣳशतिः॥१६॥ मरुत्वंतंवृषभंवावृधानमकवारिंदिव्यꣳशासमिंद्रं॥ विश्वा
साहमवसेनूतनायोग्रꣳसहोदामिहतꣳहुवेम॥ उपयामगृहीतोसीन्द्रायत्वामरुत्वतएषतेयोनिरिंद्रायत्वाम

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः रुत्वते॥ मरुत्वंतꣳ षड्विꣳशतिः॥ १७॥ इंद्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य॥ तव प्रणीती तव सं. प्र. ४

शूर शर्मन्ना विवासंति कवयः सुयज्ञाः॥ उपयाम गृहीतोसींद्राय त्वा मरुत्वत एष ते योनि रिंद्राय त्वा मरु

त्वते॥ इंद्र मरुत्व एकान्नत्रिꣳशत्॥ १८॥ मरुत्वाꣳ इंद्र वृषभो रणाय पिबा सोम मनुष्वधं मदाय॥ आसिंच

स्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रदिवः सुतानां॥ उपयाम गृहीतोसींद्राय त्वा मरुत्वत एष ते योनि रिंद्राय

त्वा मरुत्वते॥ मरुत्वानेकान्नत्रिꣳशत्॥ १९॥ महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव॥ स्तोमैर्व

त्सस्य वावृधे॥ उपयामगृहीतोसि महेंद्राय त्वैष ते योनि र्महेंद्राय त्वा॥ महानेकान्नविꣳशतिः॥ २०॥ महा

ꣳ इंद्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः॥ अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भू

त्॥ उपयामगृहीतोसि महेंद्राय त्वैष ते योनिर्महेंद्राय त्वा॥ महान्नृवत्षड्विꣳशतिः॥ २१॥ कदाचन स्तरीर

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

सिनेंद्रसश्चसिदाशुषे॥ उपोपेंनुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते॥ उपयामगृहीतोस्यादित्येभ्यस्त्वा॥
कदाचनप्रयुच्छस्युभेनिपासिजन्मनी॥ तुरीयादित्यसवनंतइंद्रियमातस्थावमृतंदिवि॥ यज्ञोदेवानांप्र
त्यैतिसुम्नमादित्यासोभवतामृडयंतः॥ आवोर्वाचीसुमतिर्ववृत्यादꣳहोश्चिद्यावरिवोवित्तरासत्॥ विवस्व
आदित्यैषतेसोमपीथस्तेनमंदस्वतेनतृप्यतृप्यास्मतेवयंतर्पयितारोयादिव्यावृष्टिस्तयात्वाश्रीणामि॥१॥
वःसप्तविꣳशतिश्च॥२२॥ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यꣳसावीः॥ वामस्यहिक्षयस्यदेव
भूरेरयाधियावामभाजःस्याम॥ उपयामगृहीतोसिदेवायत्वासवित्रे॥ वामंचतुर्विꣳशतिः॥२३॥ अदब्धेभिःस
वितःपायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनोगयं॥ हिरण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोअघशꣳसईं
शत॥ उपयामगृहीतोसिदेवायत्वासवित्रे॥ अदब्धेभिस्त्रयोविꣳशतिः॥२४॥ हिरण्यपाणिमूतयेसवितारमु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰

पंह्वये॥सचेह्मोदेवत्तोप्रदं॥उपयामगृहीतोसिदेवायत्वासवित्रे॥ हिरण्यपाणिंचतुर्दश॥२५॥ सुशर्मासिसुप्रति स॰ प्र॰ ४
ष्ठानोबृहदुक्षेनमएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥ सुशर्मद्वादश॥२६॥ बृहस्पतिसुतस्यतइंदोइंद्रियावतः
पत्नीवंतंग्रहंगृह्णाम्यग्ना३इपत्नीवा३सजूर्देवेनत्वष्ट्रासोमंपिबस्वाहा॥ बृहस्पतिसुतस्यपंचदश॥२७॥
हरिरसिहारियोजनोहर्योःस्थाताःवज्रस्यभर्तापृश्नेःप्रेतातस्यतेदेवसोमेष्टयजुषःस्तुतस्तोमस्यशस्तोक्थ
स्यहरिवंतंग्रहंगृह्णामिहरीस्थहर्योर्धानाःसहसोमाइंद्रायस्वाहा॥ हरिरसिषड्विंशतिः॥२८॥ अग्नआयू
ंषिपवसआसुवोर्जमिषंचनः॥ आरेबाधस्वदुच्छुनां॥ उपयामगृहीतोस्यग्नयेत्वातेजस्वतएषतेयोनिरग्न
येत्वातेजस्वते॥ अग्नआयूंषिन्नयोविंशतिः॥२९॥ उत्तिष्ठन्नोजसासहपीत्वाशिप्रेअवेपयः॥ सोममिंद्र
चमूसुतं॥ उपयामगृहीतोसीन्द्रायत्वौजस्वतएषतेयोनिरिंद्रायत्वौजस्वते॥ उत्तिष्ठन्नेकविंशतिः॥३०॥तर

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

णिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य॥ विश्वमाभासिरोचनं॥ उपयामगृहीतोसि सूर्यायत्वा भ्राजस्वतएषते यो

निः सूर्यायत्वा भ्राजस्वते॥ तरणिर्विꣳशतिः ॥३१॥ आप्यायस्वम दिंतमसोम विश्वाभिरूतिभिः॥ भवानः सप्रथ

स्तमः ॥१॥ आप्यायस्वनवे॥ ३२॥ ईयुष्टेयेपूर्वतरामपश्यन्व्युच्छंतीमुषसंमर्त्यासः॥ अस्माभिरूनुप्रतिचक्ष्या

भूदोतेयंतियेअपरीषुपश्यान्॥ ईयुरेकान्नविꣳशतिः ॥३३॥ ज्योतिष्मतींत्वासादयामिज्योतिष्कृतंत्वासाद

यामिज्योतिर्विदंत्वासादयामि भास्वतींत्वासादयामिज्वलंतींत्वासादयामिमल्मलाभवंतींत्वासादयामिदीप्य

मानांत्वासादयामिरोचमानांत्वासादयाम्यजस्रांत्वासादयामिबृहज्ज्योतिषंत्वासादयामिबोधयंतींत्वासाद

यामिजाग्रतींत्वासादयामि॥ ज्योतिष्मतीꣳषट्त्रिꣳशत्॥३४॥ प्रयासायस्वाहा यासायस्वाहा वियासाय

स्वाहासंयासायस्वाहोद्यासायस्वाहावयासायस्वाहाशुचेस्वाहाशोकायस्वाहातप्यत्वैस्वाहातपते

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु॰ स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ प्रयासाय चतुर्विꣳशतिः ॥ ३५ ॥ चित्तꣳ संतानेन भवं यक्ना रु सं॰ प्र॰ ४
द्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तः पार्श्वेनौषि
ष्ठहनꣳ शिंगीनिकोश्याभ्यां ॥ चित्तमष्टादश ॥ ३६ ॥ आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ॥ अर्वा
चीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ उपयामगृहीतोसींद्राय त्वा षोडशिन एष ते योनिरिंद्राय त्वा षोड
शिने ॥ आतिष्ठ षड्विꣳशतिः ॥ ३७ ॥ इंद्रमिद्धरी वहतो प्रतिधृष्टशवसमृषीणां च स्तुतीरुप यज्ञं च मानु
षाणां ॥ उपयामगृहीतोसींद्राय त्वा षोडशिन एष ते योनिरिंद्राय त्वा षोडशिने ॥ इंद्रं त्रयोविꣳशतिः ॥ ३८
॥ असावि सोम इंद्र ते शविष्ठ धृष्णवा गहि ॥ आ त्वा पृणक्त्विंद्रियꣳ रजः सूर्यं न रश्मिभिः ॥ उपयामगृहीतोसीं
द्राय त्वा षोडशिन एष ते योनिरिंद्राय त्वा षोडशिने ॥ असावि सप्तविꣳशतिः ॥ ३९ ॥ सर्वस्य प्रतिशीवरी भूमिस्त्वो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

पस्थआधित॥ स्योनास्मैसुषदाभवयच्छास्मैशर्मसप्रथाः॥ उपयामगृहीतोसीं द्रायत्वाषोडशिने एषते योनि
रिंद्रायत्वाषोडशिने॥ सर्वस्यबर्हिं ऽशातिः॥४०॥ महाँ इंद्रोवज्रबाहुः षोडशी शर्मयच्छतु॥ स्वस्तिनो
मघवाकरोतुहंतुपाप्मानंयोस्मांद्वेष्टि॥ उपयामगृहीतोसीं द्राय त्वा षोडशिने एषते योनिरिंद्रायत्वा
षोडशिने॥ महान्बर्हिं ऽशातिः॥४१॥ सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहंछूरविद्वान्॥ जहिशत्रू
ऽरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥ उपयामगृहीतोसींद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वा
षोडशिने॥ सजोषास्त्रि ऽशत्॥४२॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥ दृशेविश्वायसूर्यम्॥ चित्रंदेवाना
मुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीअंतरिक्षऽसूर्यआत्माजगतस्तस्थुषश्च॥ अ
ग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंवि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. धेम॥ दिवंगच्छसुवः पतरूपेण॥१॥ वोरूपमभ्यैमिवयसावयः॥ तुथो वौ विश्ववेदा विभंजतु वर्षिष्ठेअ सं. प्र.
धिनाके॥ एतत्तेअग्नेराध ऐतिसोमेच्युतं तन्मित्रस्य पथानयर्त्तस्य पथाप्रेतचंद्रदक्षिणायज्ञस्यप ४
थासुवितानयंतीब्राह्मणमद्यराध्यासमृषिमार्षेयंपितृमंतंपैतृमत्यꣳ सुधातुंदक्षिणंविसुवः पश्यव्यंतरि
क्षंयतस्वसदस्यैरस्मद्दोत्रादेवत्रागच्छतमधुमतीः प्रदातारमाविशतानवहायास्मांदेवयानेनपथेतसुकृतां
लोकेसीदततन्नःसꣳस्कृतं॥ रूपेणसदस्यैरव्यादशच्या॥ ४३॥ धातारातिःसवितेदंजुषंतांप्रजापतिर्नि
धिपतिर्नोअग्निः॥ त्वष्टाविष्णुः प्रजयासꣳरराणोयजमानायद्रविणंदधातु॥ समिंद्रणोमनसानेषि
गोभिःसꣳसूरिभिर्मघवन्त्सꣳस्वस्त्या॥ संब्रह्मणादेवकृतंयदस्तिसंदेवानाꣳ सुमत्यायज्ञियानां॥ संव
र्चसापयसासंतनूभिरगन्महिमनसासꣳशिवेन॥ त्वष्टानोअत्रवरिवःकृणोतु॥१॥ अनुमार्ष्टुतनुवोयद्विलि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ष्टं॥ यदद्यत्वाप्रयतियज्ञे अस्मिन्नग्नेहोतारमवृणीमहीह॥ ऋधगयाडृधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्॥ स्वगावोदेवाः सदनमकर्मयआजग्मसवनेदंजुषाणाः॥ जक्षिवाᳪंसः पपिवाᳪंसश्च विश्वे स्मेधत्तवसवोवसूनि॥ यानावहउशतोदेव देवांस्तान्॥२॥ प्रेरयस्वेअग्नेसधस्थे॥ वहमानाभर माणा हवीᳪंषिवसुंघर्मं दिवमातिष्ठतानु॥ यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहैष तेयज्ञोयज्ञपतेसहसूक्तवाकः सुवीरःस्वाहादेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमन्नोदे वदेवेषुयज्ञᳪंस्वाहावाचिस्वाहावातेधाः॥३॥ कृणोतुतानष्टाचत्वारिᳪंशच्च॥४४॥ उरुᳪंराजावरु णश्चकारसूर्यायपंथामन्वेतवाउ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्॥ शतंतेराजन्भिष जः सहस्रमूर्वीगंभीरासुमतिष्टे अस्तु॥ बाधस्वद्वेषोनिर्ऋतिंपराचैः कृतंचिदेनः प्रमुमुग्ध्यस्मत्॥ अभिष्ठितो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः वरुणस्यपाशोग्नेरनीकमपआविवेश ॥ अपांनपात्प्रतिरक्षन्नसुर्यंदमेदमे ॥१॥ समिधंयक्ष्यग्ने ॥ प्रतिते सं. प्र. ४
जिह्वाघृतमुच्चरण्येत्समुद्रेतेहृदयमप्स्वंतः ॥ संत्वाविशंत्वोषधीरुतापोयज्ञस्यत्वायज्ञपतेहविर्भिः ॥ सू
क्तवाकेनमोवाकेविधेमावभृथनिचंकुणनिचेरुरसिनिचंकुणावदेवैर्देवकृतमेनोयाडवमर्त्यैर्मर्त्यकृ
तमुरोरानोदेवरिषस्पाहि सुमित्रानआपओषधयः ॥२॥ संतुदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंच
वयंद्विष्मोदेवीरापएषवोगर्भस्तंवः सुप्रीतꣳसुभृतमकर्मदेवेषुनः सुकृतोब्रूतात्प्रतियुतोवरुण
स्यपाशः प्रत्यस्तोवरुणस्यपाशएधोस्येधिषीमहि समिदसितेजोसितेजोमयिधेह्यपो
अन्वचारिषꣳरसेनसमसृक्ष्महि ॥ पयस्वाꣳ अग्नआगमंतंमासꣳसृजवर्चसा ॥ ३ ॥ द
मेदम ओषधयआषट्च ॥ ४५ ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्योजोहवीमि ॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमंश्यां ॥ यस्मैत्वꣳसुकृतेजातवेदउलोकमग्नेकृणवः
स्योनं ॥ अश्विनꣳसपुत्रिणंवीरवंतंगोमंतꣳरयिन्नंशतेस्वस्ति ॥ त्वेसुपुत्रशवसोवृत्रन्कामंकातयः ॥ नत्वामिं
द्रातिरिच्यते ॥ उक्थउक्थेसोमइंद्रंममादनीथेनीथेमघवानं ॥ १ ॥ सुतासः ॥ यदीꣳसबाधःपितरंनपुत्राःसंभा
नदक्षाअवसेहवंते ॥ अग्नेरसेनतेजसाजातवेदोविरोचसे ॥ रक्षोहामीवचातनः ॥ अपोअन्वचारिषꣳरसेन
समसृक्ष्महि ॥ पयस्वाꣳअग्नआगमंतंमासꣳसृजवर्चसा ॥ वसुर्वसुपतिर्हिकमस्यग्नेविभावसुः ॥ स्याम
तेसुमतावपि ॥ त्वामग्नेवसुपतिंवसूनामभिप्रमंदे ॥ २ ॥ अध्वरेषुराजन् ॥ त्वयावाजंवाजयंतोजयेमाभिष्या
मपृत्सुतीर्मर्त्यानां ॥ त्वामग्नेवाजसातमंविप्रावर्धंतिसुष्टुतं ॥ सनोरास्वसुवीर्यं ॥ अयंनोअग्निर्वरिवःकृणो
त्वयंमृधःपुरएतुप्रभिंदन् ॥ अयꣳशत्रूंजयतुजर्हृषाणोयंवाजंजयतुवाजसातौ ॥ अग्निनाग्निःसमिध्यतेकवि

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजु. गृहपतिर्युवा ॥ हव्यवाड्जुह्वास्यः ॥ त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता ॥ सखा सख्या समिध्यसे ॥ उदग्ने शुचयस्तव विज्योतिषा ॥ ३ ॥ मघवानं मंदेष्यग्ने चतुर्दश च ॥ ४६ ॥ वाचः प्राणाय त्वा ॥ उपयामगृहीतोस्य पानाय त्वा ॥ आवायो वायवे सजोषोभ्यां त्वा ॥ अयमृतायुभ्यां त्वा ॥ यावामश्विभ्यां माध्वीभ्यां त्वा ॥ प्रातर्युजावश्विभ्यां त्वा ॥ अयं वेनः शंडाय त्वैष ते योनिर्वीरतां पाहि ॥ तं मर्काय त्वैष ते योनिः प्रजाः पाहि ॥ ये देवास्त्रिꣳ श द्राग्रयणोसि विश्वेभ्यस्त्वा देवेभ्यः ॥ उपयामगृहीतोसीन्द्राय त्वोक्थायुवे ॥ मूर्धानमग्नये त्वा वैश्वानराय ॥ मधुश्च सꣳ सर्पः ॥ इन्द्राग्नी इन्द्राग्निभ्यां त्वा ॥ ओमासो विश्वेभ्यस्त्वा देवेभ्यः ॥ मरुत्वंतं त्रीणीन्द्राय त्वा मरुत्वते ॥ महांइन्द्रो महेन्द्राय त्वा ॥ कदाचनादित्येभ्यस्त्वा ॥ कदाचन स्तरीर्विवस्व आदित्य ॥ इन्द्रꣳ शुचिरपः ॥ वामं त्रीणि देवाय त्वा सवित्रे ॥ सुशर्मा विश्वेभ्यस्त्वा देवेभ्यः ॥ बृहस्पतिस्त्वष्टा सोमं पिब स्वाहा ॥ हरिरसि सह सोमा इन्द्राय स्वा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

सं. प्र. ४

हा ॥ अग्नआयूंꣳ ष्यग्नयैत्वा तेजस्वते ॥ उत्तिष्ठंनिंद्रायत्वौजस्वते ॥ तरणिः सूर्यायत्वा भ्राजस्वते ॥ आतिं

ष्ठाधाः षडिंद्रायत्वाषोडशिनै ॥ उदुत्यं चित्रमग्नेनय दिवंगच्छ ॥ उरुमायुष्टे यद्देवामुमुग्धि ॥ अग्नाविष्णूमुमु

क्तं ॥ यस्त्वासुष्टुतं ॥ त्वमग्नेसुष्टुतिं ॥ परावैपंक्त्यः ॥ देवा वै ये देवाः पंक्त्यौ ॥ परावैसंवाचं ॥ भूमिर्लोकः

सलोकः ॥ विष्णोरुदुत्तमममन्नपतेपुनस्त्वादित्याः ॥ आददेवाचस्पतयउपयामगृहीतोस्यावीयो अयंवां

यावांप्रातर्युजावयं वेनस्तंप्रत्नथा येदेवास्त्रिꣳ शदुपयाम गृहीतोसिमूर्धानंमधुश्चेंद्राग्नी ओमासो मरु

त्वंतमिंद्रमरुत्वोमरुत्वान्महान्महांनृवत्कदाबामनमदक्षेभिर्हिरण्यपाणिꣳ सुशर्माबृहस्पतिर्हरिर

स्यग्नेउत्तिष्ठंतरणिराप्यास्वेयुष्टेयेज्योतिष्मतीप्रयासाय चित्तमातिष्ठेंद्रमसोविसर्वस्यमहान्स

जोषाउदुत्यंधातोरुꣳ हि यस्त्वाषट्चत्वारिꣳशत् ॥ ४६ ॥ आददे येदेवामहानुत्तिष्ठन्त्स

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

र्वस्यसंतुदुर्मित्राश्चतुः पंचाशत् ॥ ५४ ॥ हरिः ॐ ॥ श्रीः ॥

यजुः ॥हरिः ॐ॥ देवासुराः संयत्ता आसन्ते देवा विजयमुपयन्तोऽग्नौ वामं वसु सन्न्यदधतेदमु नो भविष्य सं.

तियदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत्तद्देवा विजित्यावरुरुत्समाना अन्वायन्तद प्र.

स्य सहसादित्सन्त सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्र्वशीयत तद्रजतम् ॥१॥ रजतꣳ हिरण्यमभ ५

वत्तस्माद्रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदन्ति त

स्माद्बर्हिषि न देयꣳ सोऽग्निरब्रवीद्भाग्यसान्यथ व इदमिति पुनराधेयं ते केवलमित्यब्रुवन्नृध्नवत्ख

लु स इत्यब्रवीद्यो मद्देवत्यमग्निमादधाता इति तं पूषाधत्त तेन ॥२॥ पूषार्ध्नोत्तस्मात्पौष्णाः पशव

उच्यन्ते तं त्वष्टाधत्त तेन त्वष्टार्ध्नोत्तस्मात्त्वाष्ट्राः पशव उच्यन्ते तं मनुराधत्त तेन मनुरार्ध्नोत्तस्मा

न्मानव्यः प्रजा उच्यन्ते तं धाताधत्त तेन धातार्ध्नोत्संवत्सरो वै धाता तस्मात्संवत्सरं प्रजाः पशवोनु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

प्रजायंतेय एवं पुनराधेयस्यर्धिंवेद ॥ ३ ॥ ऋध्नोत्येव योस्यैवंबंधुतांवेदबंधुमान्भवतिभागधेयंवाअ

ग्निराहितइच्छमानः प्रजांपशून्यजमानस्योपदोद्वावोद्वास्यपुनरादधीतभागधेयेनैवैनꣳसमर्धयत्य

थोशांतिरेवास्यैषापुनर्वस्वोरादधीतैतद्वैपुनराधेयस्यनक्षत्रंयत्पुनर्वसूस्वायामेवैनंदेवतायामाधायब्रह्म

वर्चसीभवतिदर्भैरादधात्ययातयामत्वायदर्भैरादधात्यद्भ्य एवैनमोषधीभ्योवरुध्याधत्ते पंचकपालः

पुरोडाशोभवतिपंचवाऋतवऋतुभ्यएवैनमवरुध्याधत्ते ॥ ४ ॥ अशीयततत्तेनवेददर्भैःपंचविꣳश

तिश्च ॥ १ ॥ परावाएषयज्ञंपशून्वपतियोग्निमुद्वासयतेपंचकपालःपुरोडाशोभवतिपांक्तोयज्ञःपांक्ताः

पशवोयज्ञमेवपशूनवरुंधेवीरहावाएषदेवानांयोग्निमुद्वासयतेनवाएतस्यब्राह्मणाऋतायवःपुरान्नमक्ष

न्पंक्त्यौयाज्यानुवाक्याभवंतिपांक्तोयज्ञपांक्तःपुरुषोदेवानेववीरंनिरवदायाग्निंपुनरा ॥ १ ॥ धत्तेशालाक्षैरा

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः भवंतिशतायुःपुरुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठतियद्वाअग्निराहितोनर्ध्यतेज्यायोभागधेयंनिका सं. प्र.
मयमानोयदाग्नेयꣳ सर्वंभवतिसैवास्यर्द्धिः संवाएतस्यगृहेवाक्सृज्यतेयोऽग्निमुद्वासयतेसवाचꣳसꣳ ५
सृष्टांयजमानईश्वरोनुपराभवितोर्विभक्तयोभवंतिवाचोविधृत्यैयजमानस्यापराभावाय ॥२॥ विभक्तिं
करोतिब्रह्मैवतदकरुपाꣳशुयजतियथावामंवसुविविदानोगूहतितादृगेवतदग्निंप्रतिस्विष्टकृतंनिराह
यथावामंवसुविविदानःप्रकाशंजिगमिषतितादृगेवतद्विभक्तिमुक्त्वाप्रयाजेनवषट्करोत्यायतनादेवनै
तियजमानोवैपुरोडाशःपशवएतेआहुतीयदभितःपुरोडाशमेतेआहुती ॥३॥ जुहोतियजमानमेवोभयतः
पशुभिःपरिगृह्णातिकृतयजुःसंभृतसंभारइत्याहुर्नसंभृत्याःसंभारानयजुःकर्तव्यमित्यथोखलुसंभृ
त्याएवसंभाराःकर्तव्यंयजुर्यज्ञस्यसमृद्ध्यैपुनर्निष्कृतोरथोदक्षिणापुनरुत्स्यूतंवासःपुनरुत्सृष्टोऽन

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

ड्वान्पुनराधेयस्यसमृध्यैसप्ततेअग्नेसमिधः सप्तजिह्वाइत्यग्निहोत्रंजुहोतियत्रयत्रैवास्यन्यक्तंततः ॥४॥ ए
वैनमवरुंधेवीरहावाएषदेवानांयोग्निमुद्वासयतेतस्य वरुण एवर्णयादग्निवारुणमेकादशकपालमनुनिर्वपेद्यंचैवहं
तियश्चास्यर्णयात्तौभागधेयेनप्रीणातिनार्तिमार्छतियजमानः ॥५॥ आपराभावायपुरोडाशमेतेआहुतीततःष
ड्ढिं ऽशच्च ॥२॥ भूमिर्भूम्नाद्यौर्वरिणांतरिक्षंमहित्वा ॥ उपस्थेतेदेव्यदितेग्निमन्नादमन्नाद्यायादधे ॥ आयं
गौःपृश्निरक्रमीदसनन्मातरंपुनः ॥ पितरंचप्रयन्त्सुवः ॥ त्रिंऽशद्धामविराजतिवाक्पतंगायशिश्रिये
॥ प्रत्यस्यवहद्युभिः ॥ अस्यप्राणादपानत्यंतश्चरतिरोचना ॥ व्यख्यन्महिषःसुवः ॥ यत्त्वा ॥१॥ क्रुद्धःपं
रोवपमन्युनायदवर्त्या ॥ सुकल्पमग्नेतत्तवपुनस्त्वोद्दीपयामसि ॥ यत्तेमन्युपरोप्तस्यपृथिवीमनुदध्वसे
॥ आदित्याविश्वेतद्देवावसवश्चसमाभरन् ॥ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंऽसमिमंदधातु ॥

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः बृहस्पतिस्तनुतामिमन्नो विश्वेदेवाइह मादयन्तां ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ॥२॥ ऋषयः स सं. प्र. ५
प्त धाम प्रियाणि ॥ सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन ॥ पुनरूर्जा निवर्तस्व पुनर
ग्न इषायुषा ॥ पुनर्नः पाहि विश्वतः ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया ॥ विश्वप्स्निया विश्वतस्परि ॥ लेकः
सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥ ३ ॥
त्वा जिह्वाः सप्त सुकेतस्ते नस्त्रयोदश च ॥ ३ ॥ भूमिर्भूम्ना द्यौर्वरिणेत्याहाशिषैवैनमाधत्ते सर्पा वै जीर्यन्तोम
न्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भिर्गार्हपत्य
मादधाति पुनर्नवमेवैनमजरं कृत्वाधत्तेऽथो पूतमेव पृथिवीमन्नाद्यं नोपानमत्सैतं ॥ १ ॥ मन्त्रमप
श्यत्ततो वै तामन्नाद्यमुपानमद्यत्सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुध्या अ
CC-0. Mrugendra Vinod Collection. Digitized by eGangotri
*. विवस्वाꣳ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥

ध्यौ अस्यामेवैनं प्रतिष्ठितमाधत्ते यत्त्वा क्रुद्धः परोवपेत्याहापह्नुत एवास्मै तत्पुनस्त्वोद्दीपयामसी
त्याह समिंध एवैनं यत्ते मन्युपरोप्तस्येत्याह देवताभिरेव ॥२॥ एनꣳ संभरति विवा एतस्य यज्ञश्छि
द्यते यो ऽग्निमुद्वासयते बृहस्पतिवत्यर्चोपतिष्ठते ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ संदधाति
विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह संतत्यै विश्वे देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्योनु
दिशति सप्त ते अग्ने समिधः सप्त जिह्वाः ॥३॥ इत्याह सप्त सप्त वै सप्तधाग्नेः प्रियास्तनुवस्ता एवावरु
न्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परिगृह्णात्या
दित्या वा अस्माल्लोकादमुं लोकमायन्ते ऽमुष्मिंल्लोके व्यतृष्यन्त इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान्हो
मानजुहवुस्त आर्ध्नुवन्ते सुवर्गं लोकमायन्यः पराचीनं पुनराधेयादग्निमादधीत स एतान्होमाञ्जुहुया

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

यजुः धामेवादित्याऋद्धिंमार्ध्नुवन्त्यामेवर्ध्नोति ॥४॥ सैतंदेवताभिरेवजिह्वाएतान्पंचविंशतिश्च ॥४॥ सं· प्र· ५
उपप्रयंतोअध्वरंमंत्रंवोचेमाग्नये ॥आरेअस्मेचशृण्वते ॥ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः ॥
पयःसहस्रसामृषिं ॥ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपांरेतांसिजिन्वति ॥ अयमिहप्र
थमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेवि
शे ॥ उभावामिंद्राग्नीआहुवध्यै ॥१॥ उभाराधसःसहमादयध्यै ॥ उभादातारौविषांरयीणामुभावाज
स्यसातयेहुवेवां ॥ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः ॥ तंजानन्नग्नआरोहाथानोवर्धयार
यिं ॥ अग्नआयूंषिपवसआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनां ॥ अग्नेपवस्वस्वपाअस्मेव
र्चःसुवीर्यं ॥ दधत्पोषंरयिं ॥२॥ मयि ॥ अग्नेपावकरोचिषामंद्रयादेवजिह्वया ॥आदेवान्वक्षियक्षिच

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

॥३३॥

॥ स नः पावक दीदिवोऽग्ने देवाँ२ इहा वह॥ उप यज्ञꣳ हविश्च नः ॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः
कविः ॥ शुची रोचत आहुतः ॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ॥ तव ज्योतीꣳष्यर्चयः ॥ आयुर्दा
अग्नेस्यायुर्मे ॥ ३॥ देहि वर्चोदा अग्नेसि वर्चो मे देहि तनूपा अग्नेसि तन्वं मे पाह्यग्ने यन्मे तन्वा ऊनं तन्म आ पृ
ण चित्रावसो स्वस्ति ते पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यश
स्कृतꣳ सुवीरासो अदाभ्यं ॥ अग्ने सपत्नदम्भनं वर्षिष्ठे अधि नाके ॥ सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणा
ꣳ स्तुतेन सं प्रियेण धाम्ना ॥ त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज ॥ ४॥ आ दुवध्यै पोषꣳ
रयिं मे वर्चसा सप्तदशाच ॥ ५॥ सं पश्यामि प्रजा अहमिडप्रजसो मानवीः ॥ सर्वा भवन्तु नो गृहे ॥ अम्भः स्थाम्भो
वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोर्जः स्थोर्जं वो भक्षीय रेवती रमध्वमस्मिँल्लोकेस्मिन्गो

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri

X

यजु. षैंस्मिन्क्षयेस्मिन्योर्नाविर्हैवस्त्तेतोमापगातबह्वीर्मैभूयस्त ॥१॥ संहितासिविश्वरूपीरामोर्जाविशागौप स. प्र. ५
त्येनारायस्पोषेणसहस्रपोषंवः पुष्यासंमयिवोरायः श्रयंतां॥ उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं॥ नमोभ
रंतएमसि ॥राजंतमध्वराणांगोपामृतस्यदीदिविं ॥ वर्धमानंस्वेदमें ॥ सनःपितेवसूनवेग्नेसूपायनोभव॥
स्वस्वानःस्वस्तये॥ अग्ने ॥२॥ त्वंनोअंतेमः॥ उतत्राताशिवोभवरूथ्यः॥ तंत्वाशोचिष्ठदीदिवः॥ सुम्ना
यनूनमीमहेसखिभ्यः॥ वसुरग्निर्वसुश्रवाः॥ अच्छानक्षिद्युमत्तमोरयिंदाः॥ ऊर्जावःपश्याम्यूर्जामापश्य
तरायस्पोषेणवःपश्यामिरायस्पोषेणमापश्यतेडास्थमधुकृतःस्योनामाविशतेरामदः॥ सहस्रपोषंवःपु
ष्यासं॥३॥ मयिवोरायःश्रयंतां॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्॥ सोमानं
स्वरणंकृणुहिब्रह्मणस्पते॥ कक्षीवंतंयऔशिजं॥ कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषे॥ उपोपेन्नु

CC-0. Mrugendra Vinod Collection. Digitized by eGangotri